A manual of divination. By Vasantarája. The divinations are made from the peculiarities in the flow of breath, (austromancy); from the sight of particular objects when starting on an expedition, such as curds, durva grass, rice, a handsome man, a fair woman with a flower, which *are auspicious; from the voice of jackals and other animals &c. &c Means* of divining answers to recondite questions are also described. Notices of Sanskrit MSS. II, p. 8.

Beginning. विरिञ्चिनारायणशङ्करेभ्यः शचीपतिस्कन्दविनायकेभ्यः ।
लक्ष्मीभवानीपतिदेवताभ्यः नमो नवभ्योऽपि सदा ग्रहेभ्यः ॥

End. यात्रामन्त्ररसायनौषधिविधौ सिद्धिप्रसिद्ध्यावहम् ।
प्राक् जन्मार्जितकर्म्मपाकपिशुनं प्रोक्तं महाशाकुनम् ॥
इति श्रीसर्व्वशाकुनं समाप्तम् ।

No. 752.

VASANTA-RA'JA-TI'KA'

वसन्तराजटीका ।

Substance, country paper. Folia, 36. Lines on a page, 12. Character, Nágara. Date, ?

A commentary on the work noticed under No. 751.

Beginning. विरिञ्चिनारायणशङ्करेभ्यः शचीपतिस्कन्दविनायकेभ्यः ।
लक्ष्मीभवानीपतिदेवताभ्यः सदा नवभ्योऽपि नमो ग्रहेभ्यः ॥

End. एतत्सर्व्वं स्थानस्य शकुनं सम्पूर्णशोभनप्रदम् ।
इति श्रीवसन्तराजशाकुने सदागमसार्थशोभने स्थानशाकुनटीका समाप्ता ।

No. 753.

VIDVAJJANA-VALLABHA.

विद्वज्जनवल्लभः ।

Substance, country paper. Folia, 10. Lines on a page, 12. Character, Nágara. Date, ?

A manual for solving astrological problems. By Bhojarája.

Beginning. भूनाथ भावि + + + + भवनकर्म
येनेह यः करतलामलकत्वमेति ।
द्वेधं तमिन्दुकविकाकविताबलेन
भोजाह्वनीकविमधं भवमामकोऽस्मि ॥

End. प्रश्नज्ञानमिदं यथार्थकथिरो विन्यस्य पादाम्बुजम् ।
श्रीविद्वज्जनवल्लभाख्यमकरोत् श्रीभोजराजः कविः ॥
इति विनाध्यायो (?) श्रीभोजराजविरचितविद्वज्जनवल्लभः सम्पूर्णः ।

No. 754.

VIJA-GANITA.

वीजगणितम् ।

Substance, country paper. Folia, 40 Lines on a page, 13. Character, Nágara. Date, ?

The elements of Algebra. By Bháskara Achárya, son of Mahes'vara. Often printed.

Beginning. उत्पादकं यत् प्रवदन्ति बुद्धेरधिष्ठितं सत्पुरुषेण सांख्याः ।
व्यक्तस्य कृत्स्नस्य तदेकबीजमव्यक्तमीशं गणितञ्च वन्दे ॥

End. आसीन्महेश्वर इति प्रथितः पृथिव्या-
माचार्य्यवर्य्यपदवीं विदुषां प्रयातः ।
लब्ध्वावबोधकलिकां तत एव चक्रे
तज्जेन वीजगणितं लघु भास्करेण ॥

ब्रह्माह्वयश्रीधरपद्मनाभ-
बीजानि यस्मादतिविस्तृतानि।
आदाय तत्सारमकारि नूनं
सद्युक्तियुक्तं लघु शिष्यतुष्टै॥

No. 755.
VIJAÑKURA.

वीजाङ्कुरः।

Substance, country paper. Folia, ? Lines on a page, ? Character, Nágara. Date, ?

A commentary on the Vi'jaganita, noticed under the last preceding No.

No. 756.
VIJODA'HARAṆA.

वीजोदाहरणम्।

Substance, country paper. Folia, 143. Lines on a page, 12. Character, Nágara. Date, ?

A key to the Vijagaṇita together with copious examples. By Bháskara A'chárya.

Beginning. उत्पादकं यत् प्रवदन्ति बुद्धे-
रधिष्ठितं सत्पुरुषेण सांख्याः।
व्यक्तस्य कृत्स्नस्य तदेकबीज-
मव्यक्तमीशं गणितञ्च वन्दे॥

End. गणकभणितिरम्यं बाललीलावगम्यं
सकलगणितसारं सोपपत्तिप्रकारम्।
इति बहुगुणयुक्तं सर्वदोषैर्विमुक्तं
पठ पठ मतिवृद्ध्यै लघ्विदं प्रौढसिद्ध्यै॥
इति वीजोदाहरणम्।

No. 757.
VIVAHA-VRINDÁVANA.
विवाहवृन्दावनम् ।

Substance, country paper. Folia, 19. Lines on a page, 30. Character, Nágara. Date, ?

On times suitable for marriage and on other particulars connected with it. By Kes'avárka.

Beginning. श्रीशार्ङ्गिणः सृजतु वो नवसंनिवेशः
सौभाग्यं चलचल(?)नयनाञ्चलश्रीः
यत्राङ्कलग्नवसलक्ष्माचचार ।

End. विशदशास्त्रविदस्त्विदमेकदा
श्रुतिगतं रसनासु विदन्त्विति इति वंशवर्णनम् ।

No. 758.
VRIHAT-SAMUDRIKA-CHINTÁMANI.
वृहत्सामुद्रिकचिन्तामणिः ।

Substance, country paper. Folia, ? Lines on a page, 20. Character, Nágara. Date, ?

Divination by palmistry and bodily signs. The author's name is not apparent.

Beginning. सामुद्रं चङ्गप्रत्यङ्गयुतं सकलं शरीरमिदानीं प्रोक्तं
श्रावर्तप्रभृतीनामनुक्रमाल्लक्षणं ब्रूमः ।
रोमत्वग्वालभवः (?) स्यादावर्त्तः शुभश्लेषा ।
शस्तो दक्षिणवलितः स्निग्धो व्यक्तः परोऽशुभः ॥

End इति कालगतिं बुद्धा बाह्याभ्यन्तरलक्षणैः ।
कुर्य्याः निःश्रेयसे यत्नं यावद्देव परिक्षया ॥
धर्म्मं शरीरिणा साध्यं शरीरं खलु दुर्लभं ।
सत्कालं यत्नैश्चैव कृत्वा देहं प्रतिष्ठितम ॥

No. 759.

YANTRA-RÁJA.

यन्त्रराजः ।

Substance, country paper. Folia, 25. Lines on a page, 16. Character, Nágara. Date, ?

Another copy. Folia, 18. Lines on a page, 11.

Directions for the preparation of a universal sun-dial. By Jaya Siñha.

Beginning. श्रादावभीष्टं यन्त्रं धातुजं दारुजं वा वर्त्तुलं कार्य्यं तस्य मध्ये केन्द्रं कृत्वा श्राय-
तिव्यासार्द्धमितेन कर्कटेन वृत्तं कार्य्यं तन्मकरद्वोराच वृत्तं भवति ।

End. होराः सूर्य्यांशाङ्कता भवन्ति ताभ्यो घटिकाज्ञानं पूर्ववत् श्रन्यो वेदविधिः स्पष्ट
एव प्रसिद्धः । इति विचारविधिः सम्पूर्णः ।

No. 760.

YANTRA-RÁJA.

यन्त्रराजः सटीकः ।

Substance, country paper. Folia, 19. Lines on a page, 40. Character, Nágara. Date, ?

Another copy. Folia, 42. Lines on a page, 12.

A guide to the preparation of an instrument by means of which the times of day and night may be accurately ascertained. By Mahendra Súri. It is accompanied by a commentary written by Malayendu.

Beginning. *प्रणम्य सर्वज्ञपदारविन्दं सूरेर्महेन्द्रस्य तथा पदाम्बुजम् ।*
तनोति तद्गुम्फितयन्त्रराजग्रन्थस्य टीकां मलयेन्दुसूरिः ॥

End. इति सूरिश्रीमलयेन्दुना विरचितेऽस्मिन् यन्त्रराजागम-
व्याख्याने प्रविचारणादिकथनाध्यायोऽगमत्पञ्चमः ।
इति यन्त्रराजागमे यन्त्रविचारणाध्यायः ।

CHAPTER IX.
SMRITI.

No. 761.
A'CHA'RA-MAYUKHA.
आचारमयूखः ।

Substance, country paper. Folia, 49. Lines on a page, 12. Character, Nágara. Date, ?

On the duties of a Bráhman from sunrise to sunset. By Nílakantha. There are several works by the author, all bearing the generic title of Mayúkha, or the 'Mirror.' They all relate to Smriti.

Beginning. पादाविवाचारस्याश्चमनेषु मुहुर्मुहुः ।
यत्पादालधितं पद्मं पद्माशादति सम्प्रति (?) ॥
श्रुतिस्मृतीर्विच्य पुराणजातं
तमिबन्धानपि सन्निबन्धान् ।
चिरन्तनाचारचयं समस्य
मन्याह्निकं सम्प्रति नीलकण्ठः ॥

End. अनेन विधिना यस्तु शान्तिं कुर्वीत शक्तितः ।
तस्य वर्षशतायुष्यं भवत्येव न संशयः
इति श्रीसगरवंशावतंसमहाराजाधिराजश्रीभगवन्तदेवादिष्टमीमांसकशङ्करभट्टा-
त्मजभट्टनीलकण्ठकृते भगवन्तभास्करे आचारमयूखः द्वितीयः ।

No. 762.
A'CHA'RYA-CHANDRIKA', S'RAUTA-PRA'TISHTHA' PADDHATI.
आचार्यचन्द्रिकायां श्रौतप्रतिष्ठापद्धतिः ।

Substance, country paper. Folia, 97. Lines on a page, 11. Character, Nágara. Date, Samvat 1626.

The diurnal religious duties enjoined on strict Hindus. By Trivikrama Súri, son of Raghu Súri. The codex contains only that portion of the work which treats of consecration.

ginning. अथवा यजमानः श्राद्धोदं कृत्वा देवोद्यापनकाले आनुकूले श्राद्धादुत्तरे द्वादशहस्त
दशहस्तं पञ्चहस्तं वा मण्डपं कृत्वा

nd. पुत्रैर्विना न सुगतिर्भवते नराणाम् दुष्पुत्रकैरपि तथा भवलोकनाशः ।
एतद्विचार्य्य———पुत्राः पुराणविहिताः परिकल्पनीयाः ॥
इति श्रीरघुसूरेः सूनुत्रिविक्रमसूरिविरचिता आचार्य्यचन्द्रिका नाम प्रतिष्ठा-
पद्धतिः समाप्ता । सं १६२६ ।

No. 763.

AGAMOKTA DANA-PRAKARA.

आगमोक्तदानप्रकारः ।

Substance, country paper. Folia, 13. Lines on a page, 9. Character, ıgara. Date, ?

Directions for consecrating gifts from religious motives, according forms and ceremonies prescribed in the Tantras. The codex is incomplete.

ginning. अस्मद्गुरुभ्यो नमः । अथान्यत् सम्प्रवक्ष्यामि अल्पद्रव्यमहत्फलम् ।
स्वर्णदीपमिति ख्यातं दानं सर्व्वोत्तमोत्तमम् ॥
कार्त्तिके पौर्णमास्याञ्च चतुर्द्दश्यामथापि वा ॥

ıd. नमोऽपराजिते तुभ्यं वरदेवाद्यपूजिते ।
प्रस्थानञ्च करिष्यामि सिद्धिर्भवतु मे सदा ॥
शमी शमयते पापं शमी शमयते रिपून् ।
शमी शमयते दुःखं शमी सर्व्वार्थदायिनी ॥
शमी कमलपत्राक्षी शमी कण्टकनाशिनी ।
आरोग्यं मे महालक्ष्मीमायुः प्राणञ्च रक्षतु ॥ इति शमीपूजा ।

No. 764.

AHNIKA.

आह्निकम् ।

Substance, country paper. Folia, 17. Lines on a page, 11. Character, ıgara. Date, ?

Daily duties of Bráhmaṇs from sunrise to the time of retiring for rest at night: a part of the Prayoga Párijáta. By Nṛisiṅha. The codex is imperfect, wanting a leaf at the beginning and some leaves at the end.

Beginning. चाद्यपत्रं न लब्धम् ।

End. कृष्णाय वासुदेवाय हरये परमात्मने ।
प्रणतक्लेशनाशाय गोविन्दाय नमो नमः ॥

No. 765.

A'HNIKA.

आह्निकम् ।

Substance, country paper. Folia, 61. Lines on a page, 11. Character, Nágara. Date, ?

Directions for the performance of the several diurnal religious duties enjoined in the Smṛitis. Anonymous.

Beginning. ग्रामाद्दक्षिणैऋतदिग्भागे सजलपूर्णपात्रो गत्वा पात्रं दूरे स्थापयित्वा दिवा चेदुदङ्मुखो रात्रौ चेद्दक्षिणामुखो यथा ॥

End. इष्टकामप्रसिद्ध्यर्थं पुनरागमनाय च ॥ इत्यनेन विसर्जनम् । ततो दक्षिणा-दानमाशीर्ग्रहणमिति देवकोत्थापनविधिः सम्पूर्णः ।

No. 766.

A'HNIKA-CHANDRIKA'.

आह्निकचन्द्रिका ।

Substance, country paper. Folia, 54. Lines on a page, 20. Character, Nágara. Date, ?

The diurnal religious duties of a Bráhmana. By Divákara, son of Mahádeva.

Beginning. प्रणम्य मातरं गङ्गां शङ्करं मम शङ्करम् ।
महादेवाख्यपितरं श्रौतस्मार्तविशारदम् ॥

End. तस्मादस्मादित्यादिनोऽर्पयामीत्येतावानेव मन्त्रो युक्तः । समाप्तोऽयम् ॥

No. 767.

A'HNIKA-LOPA-PRA'YAS'CHITTA.

आह्निकलोपप्रायश्चित्तं ।

Substance, country paper. Folia, 63. Lines on a page, 11. Character, Nágara. Date, ?

Another copy. Folia, 12. Lines on a page, 15. Incomplete.

Expiations for omissions of the prescribed diurnal duties. By Kamalákara Bhaṭṭa, son of Rámakṛishṇa Bhaṭṭa.

Beginning. नत्वा रामञ्च पितरौ कमलाकरशर्म्मणा ।
रामकृष्णतनूजेन षक्तृचाह्निकमुच्यते ॥ तत्र रात्रेः पश्चिमयामार्द्धं मुहूर्त्तो ब्राह्म उच्यते । इति मदनपारिजाते पितामहोक्ते सन्ध्यापूर्व्वघटिकाद्वये ब्राह्मे मुहूर्त्ते उत्थाय मातापितरावभीष्टदेवञ्च नत्वा । शरीरचिन्तां कृत्वा ।

End. पराकादिस्वरूपं मत्कृते प्रायश्चित्तरत्ने ज्ञेयम् । मूलञ्च माधवमिताचराशूलपाणि-मदनरत्नमदनपारिजातादौ स्पष्टम् ।
इति श्रीमज्जगद्गुरुमीमांसकनारायणभट्टसूनुरामकृष्णभट्टात्मजकमलाकरभट्टकृतौ आह्निकलोपप्रायश्चित्तानि ॥

No. 768.

A'HNIKA-MANJARI'-TI'KA.

आह्निकमञ्जरीटीका ।

Substance, country paper. Folia, 87. Lines on a page, 14. Character, Nágara. Date, ?

A commentary on a work called A'hnikamanjarí on the diurnal duties. By Víres'vara, son of Hari Paṇḍita, and grandson of S'iva Paṇḍita.

Beginning. यतो यतो यामि महीतलेऽस्मिन् तस्यैव तत्रापि यशोऽप्रदीपम् ।
यत्सन्द्रशास्त्रैकनिवासभूमीस्तमीसदोचावता शिवोऽभूत् (?) ॥

End. शाके वियच्छरशरेन्दुमिते किलाब्दे कीलाभिधे शितनभःप्रतिपद्यकारि ।
श्रीशैवपण्डितहरेस्तनयेन नाम्ना + + + निर्म्मितपद्यटीका ॥
इति श्रीविद्याविद्योतमानपुण्यस्तम्भस्थितगौतमीतीरनिवासिशिवपण्डितात्मज-हरिपण्डितसुतवीरेश्वरकृताह्निकमञ्जरीटीका समाप्ता ॥

No. 769.

A'HNIKA-PADDHATI.

आह्निकपद्धतिः ।

Substance, country paper. Folia, 57. Lines on a page, 11. Character, Nágara. Date, ?

On the diurnal duties of an orthodox Hindu. It is an extract from the Prayoga-ratna of Bhaṭṭa Náráyaṇa.

Beginning. प्रातरुत्थाय रात्रिवासः परित्यज्य आचम्य श्रीगुरुं श्रीपतिञ्च हृदये ध्यात्वा विश्वेशं माधवं ढुण्ढिं दण्डपाणिञ्च भैरवम् ।

End. आचार्यायाथ दक्षिणां दत्वा सर्व्वान् विसर्जयेत् कर्म्माङ्गभूतानष्टब्राह्मणान् भोजयेत् इति प्रयोगरत्ने सङ्क्षेपेणार्कविवाहविधिः ।

No. 770.

A'HNIKA-PRAYOGA.

आह्निकप्रयोगः ।

Substance, country paper. Folia, 38. Lines on a page, 8. Character, Nágara. Date, ?

Another copy. Folia, 17. Lines on a page, 9.

Another copy. Folia, 27. Lines on a page, 9.

The proper daily duties of Bráhmans from sunrise to the time of retiring for rest at night. This is different from the work described under No. 764, but it too is imperfect, wanting some leaves at the end. By Raghunátha Bhaṭṭa, son of Mádhava Bhaṭṭa. Notices, Sanskrit MSS. III. p. 325.

Beginning. भृगुर्वशिष्ठः क्रतुरङ्गिराश्च मनुः पुलस्त्यः पुलहश्च गौतमः ।
रैभ्यो मरीचिश्च्यवनश्च दक्षः कुर्व्वन्तु + + ॥ १ ॥
सनत्कुमारः सनकः सनन्दनः सनातनोऽथ सुरपिङ्गलौ च ।
सप्तास्वराः सप्तरसातलानि कुर्व्वन्तु सर्व्वे मम सुप्रभातम् ॥

End. गार्गी सवलभी वड्वाप्राथितेयी सुलभा मैत्रेयी कहोलश्च ॥

No. 771.

A'HNIKA-RATNA.

आह्निकरत्नं ।

Substance, country paper. Folia, 27. Lines on a page, 9. Character, Nágara. Date, ?

A treatise on diurnal duties. By Dákshiṇátya Síromaṇi.

Beginning. ब्राह्मे मुहूर्त्ते चोत्थाय चिन्तयेदात्मनो हितम् ।

कृत्वा नारायणं देवं स्तोत्राण्यपि च सञ्जपेत् ॥

End. प्रदोषपश्चिमौ सन्ध्ये वेदाभ्यासेन यो नयेत् ।

यामद्वयं शयानस्य ब्रह्मभूयाय कल्पते ॥

इति श्रीदाक्षिणात्यशिरोमणिभट्टविरचिते आह्निकरत्ने तृतीयप्रकाशः समाप्तः ।

No. 772.

A'HNIKA-VIDHI.

आह्निकविधिः ।

Substance, country paper. Folia, 53. Lines on a page, 12. Character, Nágara. Date, Samvat 1632.

Directions for the performance of the diurnal duties prescribed in the Smṛitis. By Náráyaṇa Bhaṭṭa, son of Rámes'vara. This is different from No. 769.

Beginning. अथ मूत्रोत्सर्गविधिः । दशहस्तं परित्यज्य मूत्रं कुर्य्यात् जलाशये ।

शतहस्तं परित्यज्य नदीतीरे चतुर्गुणम् ॥

End. इदं विष्णुर्विचक्रम इति मन्त्रेण पित्रभोजनं निवेदयेत् ब्रह्मार्पणं ब्रह्म हविरित्युक्त्वा विनिवेदयेत् । इति भट्टरामेश्वरसुतनारायणभट्टविरचित आह्निकविधिः समाप्तः । संवत् १६३२ ।

No. 773.

AINDRI-MAHAS'ANTI PRAYOGA.

ऐन्द्रीमहाशान्तिप्रयोगः ।

Substance, country paper. Folia, 22. Lines on a page, 10. Character, Nágara. Date, ?

Rules for the performance of the rite called Aindri Mahás'ánti, and of the ceremonies connected with the rite of coronation. By Kamalákara Bhaṭṭa, son of Rámakrishṇa.

Beginning. आदौ कर्त्ता षोडशहस्तं मण्डपं मध्ये ऐन्द्री तदुत्तरं पद्मं चतुरस्रं वा द्विहस्तं कुण्डं ध्वजापताकाश्च चित्रधूम्रनीलकृष्णपाण्डुरक्तपीतश्वेतवर्णाः ।

End. ततो देवतानामुत्तरपूजां कृत्वाग्निं सम्पूज्य विभूतिं धृत्वा विसृज्य सम्भारान् पुरोहिताय दत्त्वा सहस्रं विप्रान् सम्भोज्य कर्म्मेश्वरार्पणं कुर्य्यात् ।

इति श्रीमीमांसकरामकृष्णभट्टात्मजकमलाकरभट्टकृत ऐन्द्रीमहाशान्तिपद्धतौ राजाभिषेकप्रयोगः समाप्तः ।

No. 774.

ANGIRA-SMRITI.

अङ्गिरःस्मृतिः ।

Substance, country paper. Folia, 7. Lines on a page, 11. Character, Nágara. Date, ?

Another copy. Folia, 5. Lines on a page, 11.
Another copy. Folia, 5. Lines on a page, 13.

One of the original law codes. By Angirá. Like the other so-called original texts this is a metrical paraphrase of a Grihya Sútra of the author to whom it is attributed.

Beginning. धर्म्मजिज्ञासुभिः सम्यगभितोजा महाद्युतिः ।
भारद्वाजादिभिः पृष्टः प्राब्रवीदेतदङ्गिराः ॥
आश्रमेषु च सर्व्वेषु वर्णानामनुपूर्व्वशः ।
प्रायश्चित्तविधिं कृत्स्नं वक्ष्यमाणं निबोधत ॥

End. अधीतो य इदं शास्त्रमुक्तमङ्गिरसा स्वयम्।
अधीत्यं सविधो विप्रः सर्व्वपापैः प्रमुच्यते ॥
इति श्रीअङ्गिरःप्रोक्तं धर्म्मशास्त्रं सम्पूर्णम्।

No. 775.

ANNAPRA'S'ANA-VIDHI.

अन्नप्राशनविधिः।

Substance, country paper. Folia, 3. Lines on a page, 10. Character, Nágara. Date, ?

On the ceremony of *Annaprás'ana* or the first eating of rice by an infant six months after its birth. Anonymous.

Beginning. वेदिकां कृत्वा वेदेरन्तस्त्रिभिः दर्भैः प्राचः पांशूनुद्धृत्य दर्भांस्त्यक्त्वा सप्तकं गोमयोदकेनोपलिप्य।

End. मातृपूजापूर्व्वकमाभ्युदयिकं कृत्वान्नप्राशनं कुर्य्यादित्यन्नप्राशनं समाप्तम्।

No 776.

ANTYA-KARMA-DI'PIKA'.

अन्त्यकर्म्मदीपिका।

Substance, country paper. Folia, 16. Lines on a page, 10. Character, Nágara. Date, ?

Directions for the performance of the last sacrament before death and obsequial rites. By Hari Bhaṭṭa Díkshita.

Beginning. विज्ञानरूपिणं रामं रुद्रेशं गुरुस्तथा। ——— अन्त्यकर्म्मप्रदीपिकाम्॥
आग्निकस्य प्रथमं इतिकर्त्तव्यता उच्यते आयमग्निहोत्रहोमानन्तरं यदि चीणो न जीविष्यतीति सम्भावना स्यात्तदा तत्कालमेव प्रातरग्निहोत्रं होतव्यम्।

End. इति दीक्षितश्रीहरिभट्टविरचितायामन्त्यकर्म्मदीपिकायां सपिण्डीकरणं समाप्तम्।

No. 777.

ANTYESHṬI-PADDHATI.

अन्त्येष्टिपद्धतिः ।

Substance, country paper. Folia, 76. Lines on a page, 9. Character, Nágara. Date, ?

Rules for the performance of funeral rites. By Ráma/

Beginning. आलोक्य सूत्रभाष्याणि तदर्थप्रतिपादकः ।
यद्यनिरवलोक्यापि निर्बन्धमन्यसम्मतम् ॥
कात्यायनपदध्यानशुद्धचेतास्तदुक्तिषु ।
अन्त्येष्टिपद्धतिं कुर्वे रामसज्जनसम्मताम् ॥

End. इति हिरण्यक्षुरेणोदरं निर्भिद्य गर्भमादाय कुमारं दृष्ट्वा जीवसु कमपुत्र इत्यनुमन्त्र्य बालं स्नपयित्वा भूमौ निधाय ग्रामश्मशानयोरन्तरं नीत्वा जातकर्म कृत्वा षष्ठे स्नान इत्यस्याः स्नानं प्रदाप्य स्नानं प्रयच्छति ।

No. 778.

ANU'PA-VILA'SA.

अनूपविलासः ।

Substance, country paper. Folia, 517. Lines on a page, 11. Character, Nágara. Date, ?

On the calculation of auspicious times for the performance of ceremonies. Written by Maṇiráma under the auspices of the king *Anúpa Siṅha.*

Beginning. शिवप्रदं श्रीशिवदत्तशर्मणः पुत्रस्य गङ्गाधरदासनाम्नः ।
प्रणम्य पादं मणिरामसञ्ज्ञकस्तनोति रम्यं समयं सतां मुदे ॥

End. एवमुक्तप्रकारेण गृहप्रवेशं कृत्वा शालां मङ्गलादिध्वनिना सह सूत्रेण वेष्टयेत् ततो गृहस्य परितः क्षीरधारया पातयेत् ततः शालाप्रतिष्ठान्ते द्विजेभ्यो भूयसीं दक्षिणां दद्यात् ततः यथाशक्ति ब्राह्मणभोजनं कारयित्वा स्वयम्भुञ्जीत ।
इति अनूपविलासे समाप्तम् ।

No. 779.

A'PASTAMBA-SMṚITI, PRA'YASCHITTA PRAKARAṆA.

आपस्तम्बस्मृतौ प्रायश्चित्तप्रकरणं।

Substance, country paper. Folia, 17. Lines on a page, 9. Character, Nágara. Date, ?

Another copy. Folia, 13. Lines on a page, 8.

A metrical paraphrase of the rules of A'pastamba regarding penances. The codex is apparently a fragment of a comprehensive work.

Beginning. आपस्तम्बं प्रवक्ष्यामि प्रायश्चित्तविनिर्णयम्।
हितार्थिनां हितार्थाय वर्णानामनुपूर्व्वशः॥
एतेषां परिवादेषु निष्कृतस्त्विषसत्तमं।
विविक्तदेशमासीनमात्मविद्यापरायणम्॥

End. विवाहोत्सवयज्ञेषु अन्तरामृतसूतके।
सद्यः शुद्धिं विजानीयात् पूर्व्वसङ्कल्पितञ्च यत्॥
देवद्रोण्यां विवाहेषु यज्ञेषु प्रकृतेषु च।
कल्पितं सिद्धमन्नाद्यं (?) न शौचं मृतसूतके॥ इति आपस्तम्बे दशमोऽध्यायः।
सं १६८८।

No. 780.

A'RA'MOTSARGA PADDHATI.

आरामोत्सर्गपद्धतिः।

Substance, country paper. Folia, 55. Lines on a page, 13. Character, Nágara. Date, ?

Directions for consecrating gardens for public use. By Bhaṭṭa Náráyaṇa, son of Bhaṭṭa Rámes'vara.

Beginning. शास्त्रेष्वधीतिः पितुरेव यः श्रीस्मृतीः समालोक्य च देशगीतः।
नारायणस्तत्तनयोऽविमुक्ते जलाशयोत्सर्गविधिं विधत्ते॥
यद्यपीह बुधोग्रीता ग्रन्थाः सन्ति पर (?)।
तथापीह विशेषो यः पद्धितैः स विविच्यताम्॥

End. भट्टरामेश्वरसुतो भट्टनारायणः सुधीः ।
मधस्य रुचिरां काशमारामोत्सर्गपद्धतिं ॥
इति श्रीभट्टरामेश्वरसुतभट्टनारायणकृतारामोत्सर्गपद्धतिः ।

No. 781.

AS'AUCHA-NIRNAYA.

अशौचनिर्णयः ।

Substance, country paper. Folia, ? Lines on a page, ? Character, Nágara. Date, ?

On the impurity of the person caused by death, birth or other causes in one's family. By Mádhavanandana, son of Rámes'vara Súri.

Beginning. श्रीरामेश्वरसूरिसूनुधिषणावदेन्दुचूडामणिः श्रीमन्माधवनन्दनो बुधवरः—— ।

End. अशौचदशकमूलश्लोकाः समाप्ताः । संवत् १७५१ ।

No. 782.

AS'VATTHA-KALPA.

अश्वत्थकल्पः ।

Substance, country paper. Folia, 9. Lines on a page, 7. Character, Nágara. Date, ?

A hymn in praise of the As'vattha tree. It professes to be an extract from the Atharva Veda. Its language shows it to be very modern.

Beginning. अश्वत्थरूपिणं देवं सर्व्वलोकपितामहम् ।
कमण्डलुधरं देवं सर्व्वकामफलप्रदम् ॥

End. यं यं कामयते कामं तं तमाप्नोत्यसंशयः ।
इहैव भोगान् भुक्ता तु विष्णुसायुज्यमाप्नुयात् ॥
इत्यथर्वणशाखोक्तः अश्वत्थकल्पः समाप्तः ।

No. 783.

ATMAPRATIKRITIDÁNA PRAYOGA.

आत्मप्रतिकृतिदानप्रयोगः ।

Substance, country paper. Folia, 3. Lines on a page, 7. Character, Nágara. Date, ?

Rules for presenting to Bráhmans a metal image of the person who wishes to atone for his sins. Anonymous.

No. 784.

ATRI-SMRITI.

अत्रिस्मृतिः ।

Substance, country paper. Folia, 6. Lines on a page, 9. Character, Nágara. Date, ?

Another copy. Folia, 16. Lines on a page, 11.
Another copy. Folia, 27. Lines on a page, 10.
Another copy. Folia, 6. Lines on a page, 10.
Another copy. Folia, 4. Lines on a page, 11.

One of the original Smritis. By Atri.

Beginning. हुत्वाग्निहोत्रमासीनमत्रिं वेदविदाम्वरम् ।
पृच्छन्ति जातसन्देहा ऋषयः शंसितव्रताः ॥
भगवन् केन दानेन जप्येन नियमेन च ।
मुच्यन्ते पातकैर्युक्तास्तन्नो ब्रूहि महामुने ॥

End. यस्त्विदं पठते शास्त्रं विप्रेभ्यश्च प्रयच्छति ।
मुच्यते सर्व्वपापेभ्यो ब्रह्मलोकं स गच्छति ॥
इति श्रीधर्म्मशास्त्रे अत्रिस्मृतौ नवमोऽध्यायः ।

No. 785.

ATURA-SANNYÁSA-VIDHI.

आतुरसन्न्यासविधिः ।

Substance, country paper. Folia, 40. Lines on a page, 10. Character, Nágara. Date, ?

On hermitage on the part of those who are incapacitated by disease from observing all the rules of that order.

Beginning. आतुराणाञ्च सन्न्यासे न विधिर्नैव च क्रिया।
प्रैषमात्रं समुच्चार्य्य सन्न्यासन्तच पूरयेत्॥

End. अन्नमुदकं वा। अमुकगोत्राय प्रेताय दद्मो। अनेन दानेन अमुकगोत्राय प्रेताय क्षुधापिपासानिवृत्तिः। अथ द्वादशाद्यपिण्डे विशेषसङ्कल्पः समाप्तः।

No. 786.

AUPA'SANA-PADDHATI.

औपासनपद्धतिः।

Substance, country paper. Folia, 6. Lines on a page, 9, 10. Character, Nágara. Date, ?

Vedic rituals for the worship of different deities. Anonymous.

Beginning. एवं गुणविशेषेण विशिष्टायां शुभतिथौ मम विच्छिन्नस्यौपासनाग्नेः पुनः सन्धानाख्यं कर्म कर्त्तुम्।

End. इदत्वामसेचभद्र् मद्दष्णियं विद्भोजःसुभीतमुपसीरं।
इन्द्रः सोमेन पञ्चदशेन मध्यमिदवातेन सगरेण रक्ष (?)॥
इति औपासनपद्धतिः सम्पूर्णा।

No. 787.

A'YUSHKARA-DA'NA PRAYOGA.

आयुष्करदानप्रयोगः।

Substance, country paper. Folia, 2. Lines on a page, 9. Character, Nágara. Date, ?

On offering a gift with a view to attain longevity. Anonymous.

Beginning. तत्र यजमानः स्नातः शुक्लाम्बरधरः आयुष्यप्राप्तिकाम आयुष्करदानमहं करिष्ये इति सङ्कल्पं कुर्य्यात्।

End. पूतानां मूर्त्तिदानानां साङ्गतासिद्ध्यर्थमृतुभ्यः प्रत्येकं सुवर्णदक्षिणां दद्यात् ततो यथाकामं भूयसी दक्षिणां दद्यात्। इति आयुष्करदानप्रयोगः।

No. 788.
AYUTALAKSHA-KOṬI HOMA-PRAYOGA.

अयुतलक्षकोटिहोमप्रयोगः ।

Substance, country paper. Folia, 18. Lines on a page, 11. Character, Nágara. Date, ?

Directions for the performance of a rite which requires the offering of a trillion of oblations to the sacrificial fire. Written by Bhadraráma, under the auspices of the king Anúpa Siñha.

Beginning. स नित्यो नैमित्तिकः काम्यश्च, अयनोपरागादावाद्यः, कर्म्मारम्भे द्वितीयः,फलार्थे काम्यः, काम्ये मण्डपादि नियतं "नित्यनैमित्तिके हित्वा सर्व्वमन्यत् समण्डपमिति" मात्स्योक्तेः । तदभावे कुड्डमण्डपः मण्डपं कुड्डमेवेति लिङ्गोक्तेः ॥

End. विद्वेषणं तथा कुर्य्यन्नैतद्देव समाचरेत् ।
इहैव फलदं पुंसामेतन्नामुत्र शोभनं ॥
तस्मात्काम्यिकमेवात्र कर्त्तव्यं भूतिमिच्छता ॥
इति मद्दयज्ञत्रयसाधारणविधिः ।
इति श्रीमहाराजाधिराजमहाराजानूपसिंहाज्ञया होमिगोपनामकभद्ररामेण अयुतहोम-लक्षहोम-कोटिहोमास्तथाथर्वणप्रयोगाश्च ॥

No. 789.
BAUDHAYANA SMṚITI.

बौधायनस्मृतिः ।

Substance, country paper. Folia, 44. Lines on a page, 12. Character, Nágara. Date, ?

The original Smṛiti text of Baudháyana. It is obviously a metrical paraphrase of the Gṛihya Sútra of Baudháyana by a follower of his school.

Beginning. उपदिष्टो धर्म्मः प्रतिवेदं तस्यानुव्याख्यास्यामः । स्मार्त्तो द्वितीयः तृतीयः शिष्टागमः । शिष्टाः खलु विगतमत्सरा निरहङ्काराः कुम्भीधान्या अलोलुपदम्भदर्पलोभमोहक्रोधविवर्जिताः ।

End. पुण्ये वा भवेदेषां मन्त्राणां कर्म्मसाधने ।
इति बौधायने धर्म्मशास्त्रे चतुर्थप्रश्ने पञ्चमोऽध्यायः । चतुर्थप्रश्नः समाप्तः
शाके १५१८ ।

No. 790.

BUDHA SMRITI.

बुधस्मृतिः ।

Substance, country paper. Folia, 2. Lines on a page, 10. Character, Nágara. Date, ?

Another copy. Folia, 2. Lines on a page, 10.

The Institutes of Budha, an exceedingly rare work.

Beginning. अथातो बुधधर्मशास्त्रं व्याख्यास्यामः । श्रेयोऽभ्युदयसाधनो धर्मः । गर्भाष्टमे ब्राह्मणो वसन्ते चात्मानमुपनयेत् ।

End. मन्त्रौषधिप्रयोगेण परं निःशङ्कं कृत्वा राज्यं गृह्णीयात् ।
गृहीत्वा देवब्राह्मणपूजनं एवं कुर्व्वन् दृष्टमदृष्टञ्च लभेतेति ॥
इति बुधप्रोक्तधर्मशास्त्रं सम्पूर्णम् ।

No. 791

CHATURVARGA-CHINTÁMAṆI, VRATA KHAṆḌA.

चतुर्वर्गचिन्तामणिः, व्रतखण्डः ।

Substance, country paper. Folia, 883. Lines on a page, 11. Character, Nágara. Date, ?

Another copy. Folia, 209. Lines on a page, 9. Incomplete.

A part of the first book of the Hemádri's Chaturvarga Chintámani, which is a digest of Hindu law and ritual, in five separate books. The first treats of Vrata or fasts; the second of Dána, or benefactions; the third of Kála, or time appropriate for the celebration of ceremonial rites; the fourth of S'ráddha, or offerings to the manes; and the 5th of miscellaneous rites and observances. The first and the second books have been printed in the Bibliotheca Indica.

Beginning. श्रीगोपालमपारवैभव + + सच्छन्दलीलालयं
चौदस्निग्धतमालकोमलदलश्यामाभिरामाकृतिं ।
कूजत्कोकिलकामिनीकलरवप्रोल्लासिगोपाङ्गना-
गीतस्फीतपवित्रचित्रचरितप्रातं नमस्कुर्म्महे ॥

उन्मीलत्कमनीयकान्तिसरसि मध्ये विमुग्धप्रभं
सारासारविचारचारुमनसा संसेव्य संसेवितम्।
नित्यानन्दपरागमङ्गसुभगं वन्दारुवृन्दारक-
श्रेणीभृङ्गमनङ्गवैरिचरणाम्भोजद्वयं पातु वः॥

End. नैमित्तिकीञ्च नित्याञ्च दक्षिणां न ददाति यः।
शृणोति च सदा तात तस्य तु निष्फलं फलम्॥
चतुर्गुणा भवेद्राजन् या नित्या दक्षिणा विभो।
समाप्ते पर्व्वणि विभो इत्याह भगवान्विधिः॥
इत्येष कथितो राजन् पुराणश्रवणे विधिः।
इति श्रीमहाराजाधिराजश्रीमहादेवसमस्तकरणाधीश्वरसकलविद्याविशारद-
श्रीहेमाद्रिविरचिते चतुर्वर्गचिन्तामणौ व्रतखण्डे प्रकीर्णकव्रतानि।

No. 792.

CHATURVARGA-CHINTÁMANI, KÁLA-NIRNAYA.

चतुर्वर्गचिन्तामणिः, कालनिर्णयः।

Substance, country paper. Folia, 500. Lines on a page, 13. Character, Nágara. Date, ?

Another copy. Folia, 110. Lines on a page, 13.

Book III of the work noticed under No. 791.

Beginning. कल्याणानि ददातु मे गणपतिः यस्मिन्न तुष्टे सति
क्षोदीयस्यपि कर्म्मणि प्रभवितुं ब्रह्मापि जिह्मायते।
जाते यच्चरणप्रणामसुलभे सौभाग्यभाग्योदये
रङ्कस्याकमनङ्गमानि विशते देवेन्द्रलक्ष्मीरपि॥

End. तदेवमेतत्सिद्धं वचनमन्तरेण गौणकालस्य ग्रहणं न कार्य्यम्।
इति हेमाद्रिकालनिर्णयः समाप्तः।

No. 793.

CHATURVARGA-CHINTÁMAṆI, PRÁYAS'CHITTA KHAṆḌA.

चतुर्वर्गचिन्तामणिः, प्रायश्चित्तखण्डः ।

Substance, country paper. Folia, 147. Lines on a page, 7. Character, Nágara. Date, ?

A part of the fifth book of the Chaturvarga Chintámaṇi of Hemádri. It is on penances.

Beginning. कमलादयितं लक्ष्म्यं कमलासनसंस्तुतम् ।

कमलाचमर्दं वन्दे कमलामोदृशायिनम् ॥

अथेदानीं हेमाद्रिणा लोकोपकारार्थं सर्व्वपुराणस्मृतिसंहितावेदज्योतिषवैधागमश्रौतस्मार्त्तकल्पेषु पन्यानालोक्य ब्रह्मचत्रविट्शूद्रादीनां ब्रह्महत्यासमानि ब्रह्मणः कायसम्भवानि हिंसादीनि सम्भवन्ति (?) ॥

End. अतः खण्डितम् ।

No. 794.

CHATURVARGA-CHINTÁMAṆI, LAKSHAṆA-SAMUCHCHAYA PRAKARAṆA.

चतुर्वर्गचिन्तामणौ परिशेषखण्डे लक्षणसमुच्चयप्रकरणम् ।

Substance, country paper. Folia, 849. Lines on a page, 13. Character, Nágara. Date, Samvat 1503.

A part of Chapter V. of the Chaturvarga-Chintámaṇi noticed under No. 791.

Beginning. भविष्यपुराणे शतानिक उवाच । नराणां योषितांश्चैव लक्षणानि महामते ।

प्रोक्तानि यानि विप्रेन्द्र व्योमकेशस्य सूनुना ॥

क्रुद्धेन यानि छिन्नानि ईश्वरेण महोदधौ ।

कृष्णस्य वचनाद्भूयः समुद्रेणार्पितानि वै ॥

अर्पितानि ततस्तस्य येन प्राप्तानि वै कथं ।

षाड्स्येन तु विप्रेन्द्र तानि मे वद सुव्रत ॥

End. इति श्रीमहादेवीयसमस्तकरणाधीश्वरसकलविद्याविशारदश्रीहेमाद्रिविरचित-चतुर्वर्गचिन्तामणौ परिशेषखण्डे लक्षणसमुच्चयप्रकरणं समाप्तम् । संवत् १५०३ । कार्त्तिकशुदि ।

No. 795.

CHATURVIŃS'ATI MATA.

चतुर्व्विंशतिमतम् ।

A. Substance, country paper. Folia, 35. Lines on a page, 10. Character, Nágara. Date, ?

B. Another copy Folia, 86. Lines on a page, 9.

C. Another copy. Folia, 61. Lines on a page, 9.

D. Another copy. Folia, 40. Lines on a page, 11.

An analysis of the opinions of the 24 Ŗishis who are renowned for their Institutes on Hindu law. Anonymous, but apparently of considerable repute as it enjoys the benefit of a commentary by no less a person than Bhaţţojí Díkshita.

Beginning. मनुना याज्ञवल्क्येन विश्वामित्रेण चात्रिणा ।
विष्णुना च वसिष्ठेन व्यासेनोशनसा तथा ॥
आपस्तम्बेन वत्सेन हारीतगुरुनारदैः ।
पराशरेण गर्गेण गौतमेन यमेन च ॥
शातातपेन शङ्खेन सम्वर्त्तेन तथैव च ।
बौधायनेन दक्षेण मास्त्रेनाङ्गिरसा तथा ॥
चतुर्व्विंशतिभिः शास्त्रं दृष्टं लोकहिताय तैः ।
धर्म्मसंरक्षणार्थाय सङ्क्षेपेण महात्मभिः ॥
एतज्ज्ञात्वा द्विजाः शीघ्रं धर्म्मं चरन्ति तत्त्वतः ।
तस्मात् सर्व्वप्रयत्नेन शास्त्रमेतदुदीरयेत् ॥

End. शातातपाय शङ्खाय सम्वर्त्ताय नमो नमः ।
भरद्वाजाय देवाय वामदेवाय ते नमः ॥
इति चतुर्व्विंशतिमतं समाप्तम् ।

No. 796.

CHATURVIŃS'ATI-MATA-VYAKHYA, AHNIKA-KANDA.

चतुर्व्विंशतिमतव्याख्यायामाह्निककाण्डम् ।

A. Substance, country paper. Folia, 29. Lines on a page, 9. Character, Nágara. Date, ?

B. Another copy. Folia, 83. Lines on a page, 10.

A commentary on the work noticed under the last preceding No. By Bhaṭṭoji Díkshita, son of Lakshmídhara. The codex contains the chapter on daily duties, *A'hnika*.

Beginning. तत्र माधवीये कूर्मपुराणे ।
ब्राह्मे मुहूर्त्ते उत्थाय धर्ममर्थञ्च चिन्तयेत् ।

End. श्रुतीनां वेदमूलत्वात् स्मार्त्तं केचित् पुरा विदुरिति ॥
व्यासः ।
श्रौतं कर्म न चेच्छक्तः कर्त्तुं स्मार्त्तं—— ॥
इति पदवाक्यप्रमाणज्ञश्रीलक्ष्मीधरसूरिसूनुना भट्टोजीदीक्षितेन रचितायां चतुर्व्विंशतिमतव्याख्यायामाह्निककाण्डं समाप्तम् ।

No. 797.

CHATURVIÑS'ATI-MATA-VYAKHYA', A'CHA'RA KA'ṆḌA.

चतुर्व्विंशतिमतव्याख्यायाम् आचारकाण्डम् ।

Substance, country paper. Folia, 10. Lines on a page, 13. Character, Nágara. Date, ?

Another part of the work noticed under the last preceding No. It treats of religious duties.

Beginning. धर्मांश्च विविधान् कृत्वा स्वर्गमोक्षफलप्रदान् ।
स्वधर्मेषु स्थितान् स्थाप्य वानप्रस्थो भवेत्ततः ॥

End. इति चतुर्व्विंशतिमतव्याख्यायामाचारकाण्डं समाप्तम् ।

No. 798.

CHATURVIÑS'ATI-MATA-VYAKHYA', PRA'YAS'CHITTA KA'ṆḌA.

चतुर्व्विंशतिमतव्याख्यायां प्रायश्चित्तकाण्डम् ।

Substance, country paper. Folia, 40 Lines on a page, 9. Character, Nágara. Date, ?

Another part of the work noticed under No. 796. It contains the chapter on expiations.

Beginning. प्रायश्चित्तशब्दश्च पापनिवर्त्तनसमधर्मविशेषे योगरूढः । प्रायशः पापस्य चित्तं शोधनम् इति व्युत्पत्तेः ।

End. प्रवृत्तप्रतिग्रहारामाद्युपलक्षणमिति विज्ञानेश्वरः । इति सूतकप्रकरणम् ।
इति श्रीचतुर्व्विंशतिमतव्याख्यायां प्रायश्चित्तकाण्डं समाप्तम् ।

No. 799.

CHATURVIÑS'ATI-MATA-VYAKHYA', SAÑSKARA KAṆḌA.

चतुर्व्विंशतिमतव्याख्यायां संस्कारकाण्डम् ।

Substance, country paper. Folia, 87. Lines on a page, 9. Character, Nágara. Date, ?

Another part of the work noticed under No. 796. It treats of the sacraments.

Beginning. सर्व्वज्ञः सकलेश्वरः श्रुतिगिरां तात्पर्य्यभूमिः परा-
द्वैतद्ध्वान्तविधूननैकपटुभिः स्वान्ते श्चिरश्चिन्तितः ।
तेषामात्मतयैव योऽद्वयवपुर्विद्योतते स्वप्रभः
स्वेच्छोपात्तमनोहराकृतिमम् श्रीबालकृष्णं नुमः ॥

End. द्वादशैव च वर्षाणि व्यायान् धर्म्मार्थयोगतः ।
व्यासः ।
+ + प्रतीचितुं भाता भूयसा नः पुनः पुनः ॥
इति श्रीचतुर्व्विंशतिमतव्याख्यायां संस्कारकाण्डं सम्पूर्णम् ।

No. 800.

CHATURVIÑS'ATI-MATA-VYAKHYA', S'RADDHA KAṆḌA.

चतुर्व्विंशतिमतव्याख्यायां श्राद्धकाण्डम् ।

Substance, country paper. Folia, 44. Lines on a page, 9. Character, Nágara. Date, ?

Another part of the work noticed under No. 796. It treats of offerings to the manes.

Beginning. तत्र प्रेतोद्देशेन श्रद्धया द्रव्यत्यागविशेषः श्राद्धं । तदाह मूले ।
स्वतानान्तु भवेत् श्राद्धं ब्राह्मणैर्वेदपारगैः ।

End. इति श्रीचतुर्व्विंशतिमतव्याख्यायां श्राद्धकाण्डं समाप्तम् ।

No. 801.

DAKSHA-SMṚITI.

दक्षस्मृतिः ।

A. Substance, country paper. Folia, 14. Lines on a page, 8. Character, Nágara. Date, ?

B. Another copy. Folia, 7. Lines on a page, 12.

The Institutes of Daksha. Printed in Calcutta.

Beginning. ब्रह्मचारी गृहस्थश्च वानप्रस्थो यतिस्तथा ।
एतेषान्तु हितार्थाय दक्षः शास्त्रमकथयत् ॥

End. य इदं पठते शास्त्रं विप्रेभ्यश्च प्रयच्छति ।
सर्व्वपापविशुद्धात्मा ब्रह्मलोके महीयते ॥

No. 802.

DÁLBHYA-SMṚITI.

दाल्भ्यस्मृतिः ।

A. Substance, country paper. Folia, 7. Lines on a page, 11. Character, Nágara. Date, ?

B. Another copy. Folia, 8. Lines on a page, 10.

The Institutes of Dálbhya. This is a very rare work, not usually noticed among the original authors of the Smṛiti. It has, however, been quoted.

Beginning. कृताभिषेकं दाल्भ्यञ्च चाश्रमे समुपस्थितम् ।
परिपृच्छन्ति तत्त्वज्ञमृषयो वेदपारगाः ॥
धर्म्माधर्म्मविवेकञ्च शुद्धिर्जातिस्तस्य च ।
आयुष्याणि च तीर्थानि मासशुद्धिस्तथैव च ॥

End. इदं दाल्भ्यकृतं शास्त्रं श्रावयिष्यति यो द्विजान् ।
सर्व्वपापविशुद्धात्मा पुण्यलोकमवाप्नुयात् ॥ इति दाल्भ्यप्रोक्तं धर्म्मशास्त्रं समाप्तम् ॥

No. 803.
DA'NA-MANOHARA.
दानमनोहरः ।

Substance, country paper. Folia, 356. Lines on a page, 9. Character, Nágara. Date, ?

On the offering of gifts. Written under the auspices of the king Manoharadása, son of Gopáladasa of Salapur, and a contemporary of Jahángir. By Sadás'iva, son of Veni Bhaṭṭa. The work was completed in the Samvat year 1735.

Beginning. यं ध्यायन्ति विरिञ्चिवासवमुखाः सर्व्वे सुराणां गणा-
त्रातारं भवभीतिभीतमनसां कारुण्यवारांनिधिम् ।
हेतुं व्याप्तचराचरस्य जगतो वेदान्तवेद्यं विभुं
वन्दे भास्तुषारभानुरुचिरं श्रेयस्करं शङ्करम् ॥
प्रणम्य परमानन्दं शङ्करं पार्व्वतीन्तथा ।
सदाशिवस्तु कुरुते ग्रन्थं दानमनोहरम् ॥

End. इति श्रीमन्नथाचात्मजश्रीमङ्गोड़वंशतिलकमहाराजमनोहरदासमहीपालाज्ञया त्रिपाठिश्रीपरमानन्दात्मजश्रीमदग्निहोत्रिसदाशिवत्रिपाठिना विरचितो दानमनोहरः सम्पूर्णः ।

No. 804.
DA'NA-MAYUKHA.
दानमयूखः ।

Substance, country paper. Folia, 163. Lines on a page, 11. Character, Nágara. Date, ?

One of a series of digests written under the common name of Mayúhha. It treats of religious gifts. By Nílakaṇṭha Bhaṭṭa, son of S'aṅkara Bhaṭṭa, and grandson of Náráyaṇa Bhaṭṭa.

Beginning. यो लीलया सन्ततेऽनुविश्वं
तत्पालयत्यात्मनि विश्वरूपे ।
लयं नयत्याशु च पूर्णरूपः
शिवं तनोत्वाशु रविर्ममासौ ॥
श्रुतीः स्मृतीर्वीक्ष्य पुराणजातं
तत्तन्निबन्धानपि सन्निबन्धान् ।

श्रीमद्धरस्यात्मज एष दाने
श्रीनीलकण्ठो विदधाति कृत्यम् ॥

End. कपिले सर्व्वभूतानां पूजनीयासि रोहिणी ।
सर्व्वतीर्थमयी यस्मादतः शान्तिं प्रयच्छ मे ॥
इति श्रीमन्नारायणभट्टनारायणसूरिसूनुपण्डितशिरोरत्नमीमांसकशङ्करभट्टात्मज-भट्टनीलकण्ठकृते भास्करे दानमयूखः समाप्तः ॥

No. 805.

DA'NA-PRAKARANA.

दानप्रकरणम् ।

Substance, country paper. Folia, 15. Lines on a page, 7. Character, Nágara. Date, ?

A treatise on religious gifts. Its author's name is not apparent.

Beginning. अथ दानप्रकरणं । गोभूतिलहिरण्याज्यं वासो धान्यं गुडानि च ।
रौप्यलवणमित्येते दशदानं प्रकीर्त्तितम् ॥

End. इति दानप्रकरणं सम्पूर्णम् ।

No. 806.

DA'NA-RATNA'KARA.

दानरत्नाकरः ।

Substance, country paper. Folia, 618. Lines on a page, 11. Character, Nágara. Date, ?

On the advantages of various kinds of gifts, and their consecration. By Bhatta Ráma, son of Vis'vanátha. It was written under the auspices of the king Bhúpa Siñha.

Beginning. सर्व्वाणीतनयं देवं सर्व्वाभीष्टप्रदायकम् ।
वन्दे सन्देहरप्रज्ञाकारणं वारणाननम् ॥

End. स्वस्ति श्रीसकलसामन्तचक्रचूडामणिकिरणरञ्जितचरणारविन्दमहाराजाधिराज-भूपसिंहाज्ञया श्रीमित्रिगोपनामकभट्टसुन्दरात्मजभट्टविश्वनाथात्मजभट्टरामविरचित दानरत्नाकरे कर्म्मविपाकोक्तदानानि । समाप्तयायं निबन्धः ।

No. 807.

DÁNA-SARAVALI.

दानसारावली ।

Substance, country paper. Folia, 130. Lines on a page, 10. Character, Nágara. Date, ?

Rules for the consecration of religious gifts. The author's name is not apparent.

Beginning. छायापत्रस्यानुपलब्धिः । सर्व्वतो भद्रमुख्यानां मण्डलानां विभक्तितः ।

विराजितं तथा चित्रपत्रवल्लीसमाकुलम् ॥

End. सुवर्णदानं प्रथममश्वदानमतः परम् ।

लिखेद्धर्म्मं कल्पलतासप्तसागरमेव च ॥

रत्नधेनुमहाभूतघटादानादि षोड्श । धर्मे खण्डितम् ॥

No. 808.

DÁNA-VAKYÁVALI.

दानवाक्यावली ।

A. Substance, country paper. Folia, 64. Lines on a page, 11. Character, Nágara. Date, ?

B. Another copy. Folia, 82. Lines on a page, 12. Date, Samvat, 1724. Defective.

A dissertation on religious gifts. By Vidyápati.

Beginning. वन्दे मुकुन्दस्य पदारविन्दं

वन्दारुवृन्दारकवृन्दवन्द्यं ।

मन्दाकिनी यन्मकरन्दबिन्दु-

मन्दोहसन्देहधियन्दधाति ॥

End. श्रीकामेश्वरराजपण्डितकुलालङ्कारसारः श्रिया-

माधीशो नरसिंहदेवनिधियलाभूमण्डलाखण्डलः ।

दर्पाद्दुर्द्दरवैरिदर्पदलनो भूद्रूपनारायणो

विष्णु सः शरदिन्दुकुन्दधवलधाम्यद्यशोमण्डलः ॥

इति श्रीविद्यापतिकृता दानवाक्यावली समाप्ता ॥

No. 809.

DARS'A-JANANA-S'ÁNTI.

दर्शजननशान्तिः ।

Substance, country paper. Folia, 49. Lines on a page, 9. Character, Nágara. Date, ?

Directions for expiations to be performed for a child born on the night of the new-moon. The author's name cannot be made out.

Beginning. अथातो दर्शजातानां मातापित्रोर्दरिद्रता ।
तद्दोषपरिहारार्थं शान्तिं वक्ष्यामि नारद ॥

End. अतः सर्व्वशान्तिर्भवति । तत आचार्य्याय सुवर्णप्रतिमां वस्त्रेन युग्मेन वेष्ठितां सवत्सां गां दद्यात । नरोत्पत्तिकालनचत्रशान्तिः ।

No. 810.

DAS'A-DÁNA-NIRṆAYA.

दशदाननिर्णयः ।

A Substance, country paper. Folia, 16. Lines on a page, 10. Character, Nágara. Date, ?

B. Another copy. Folia, 15. Lines on a page, 15.

A fragment of a Smriti treatise. It contains directions for offering ten particular articles to Bráhmaṇas.

Beginning. अथ दानप्रकरणमारभ्यते । दातव्यं प्रत्यहं पात्रे निमित्ते तु विशेषतः ।
याचितेनापि दातव्यं श्रद्धापूतं तु शक्तितः ॥

End. इति दशदानानि ।

No. 811.

DAS'AKARMA-PADDHATI.

दशकर्म्मपद्धतिः ।

Substance, country paper. Folia, 22. Lines on a page, 12. Character, Nágara. Date, ?

Rules for the performance of the ten essential Sañskáras or sacraments. The codex is incomplete, and the author's name is not apparent.

Beginning. सांवत्सरिकस्य चूड़ाकरणं । संवत्सरो जातो यस्य स सांवत्सरिकः ॥ तस्य बालकस्य चूड़ाकरणम् ॥ चूड़ाकरणाख्यं कर्म्म कुर्य्यादिति शेषः । चूड़ाकरणमिति वक्ष्यमाणसंस्कारे नामधेयार्थम् ॥

End. आचार्य्यस्तु भिक्षां भोरित्येव भिक्षां स्वीकुर्य्यात् । ततो ब्रह्मचारी शुचिर्भूत्वा स्वासने उपविशति । ततो वह्निहोमादिकम् ॥ अतः खण्डितम् ।

No. 812.

DAS'A-SAŃSKA'RA-PADDHATI.

दशसंस्कारपद्धतिः ।

Substance, country paper. Folia, 51. Lines on a page. 11. Character, Nágara. Date, ?

Rules for the performance of the essential Sañskáras or sacraments. Sixteen rites have been described, though the name of the work limits the number to ten.

Beginning. पूर्व्वोक्तं गुणविशेषणविशिष्टायां पुण्यतिथौ मम पद् विच्छिन्नस्यौपासनाग्नेः पुनः सन्धानहवनं करिष्ये ।

End. कङ्कणं मोचयाम्यद्य चाप्यन्तु न कदाचन ।
गौरखां स्थिरां देवी त्वं गच्छ सकङ्कटो(?) ॥ इति षोड़शिकर्म्म समाप्तम् ।

No. 813.

DAS'A-S'LOKI' TI'KA'.

दशश्लोकी-टीका ।

Substance, country paper. Folia, 5 Lines on a page, 11. Character, Nágara. Date, ?

A commentary on a Smṛiti work consisting of ten s'lokas. It is on mourning or impurity caused by death, birth, abortion, &c. in a family. This is apparently different from the Dayádas'a-s'loki edited by Dr. A. C. Burnell, which treats of inheritance.

Beginning. मासत्रयमध्ये गर्भस्रावे मातुस्त्रिदिनमशौचं तदनन्तरं त्रिषु मासेषु मासममत्रम् अतः
पश्चात् सूतिकावधिर्दशाहादि ।

End. ब्रह्मक्षीसुतशिष्यदासभृतकाभर्त्रादिवद्धान्धवे ।
हीने स्वं लघु वा तदीयमधिके शुद्धैः समाः सङ्कराः ॥ इति दशश्लोकी ।

No. 814.

DATTAKA-MI'MA'ŃSA'.

दत्तकमीमांसा ।

Substance, country paper. Folia, 65. Lines on a page, 10. Character, Nágara. Date, ?

An exposition of the law of adoption. By Nanda Pandita, son of Ráma Paṇdita. The work is held to be a standard authority on the subject it treats of.

Beginning. अभिनन्द्य जगद्वन्द्यपदद्वयविनायकम् ।
पुत्रीकरणमीमांसां कुरुते नन्दपण्डितः ॥
केन कीदृक् कदा कस्मै कस्मात् कः क्रियतां सुतः ।
विविच्य नोक्तं यत् पूर्व्वैस्तदशेषमिहोच्यते ॥ अथ दत्तपुत्रमीमांसा ।

End. चतुर्थभागभागी स्याद्दत्तक इति तदभावे तु सर्व्वहरः । इति श्रीमद्धर्म्माधिकारि-
रामपण्डितात्मजश्रीनन्दपण्डितविरचिता दत्तकमीमांसा समाप्ता ।

No. 815.

DATTAKA-SAPINḌA-NIRṆAYA.

दत्तकसपिण्डनिर्णयः ।

Substance, country paper. Folia, 15. Lines on a page, 10. Character, Nágara. Date, ?

On mourning and impurity of an adopted son on the death of the relatives of his adopted father. This is apparently a fragment of a more elaborate work.

Beginning. अथ दत्तपुत्राशौचविषये विचार्यते । तत्र मनुः ।

पितुः पुत्रेण कर्त्तव्याः पिण्डदानोदकक्रियाः ।

पुत्राभावे तु पत्नी स्यात्तदभावे तु सोदरः ॥ इति ॥

End. सपिण्डविषयत्वाद्दत्तकस्य प्रतिग्रहीतृपित्रोस्तत्सपिण्डानाञ्च जन्ममरणे दशाहाशौचमेव भवतीति ॥

No. 816.

DEVADÁSA-PRAKÁŚA.

देवदासप्रकाशः ।

Substance, country paper. Folia, 35. Lines on a page, 13. Character, Nágara. Date, ?

Lunar days, their relation to each other, and the religious rites to be performed on those days. By Devadása.

Beginning. आदावेव + + स्वयं भुङ्क्ते शेषियमात्मतम् ।

यो देवो पितृरूपेण तं वन्दे यज्ञपूरुषम् ॥

मिश्रश्रीदेवदासेन निबन्धोऽयम्प्रकाशितः ।

देवदासप्रकाशाख्य एष सद्भिर्विविच्यताम् ॥

End. यज्ञादिकं प्रतिष्ठाञ्च दानकर्म्म प्रतिग्रहम् ।

याचोत्सवञ्च देवादेः शपथं दिव्यमेव च ॥

मलमासे न कुर्व्वीत व्यासस्य वचनं यथा ।

इति श्रीदेवदासप्रकाशे मलमासनिर्णयः ।'

No. 817.
DEVALA-SMṚITI.
देवलस्मृतिः ।

A. Substance, country paper. Folia, 6. Lines on a page, 9. Character, Nágara. Date, ?

B. Another copy. Folia, 4. Lines on a page, 10.

C. Another copy. Folia, 4. Lines on a page, 10.

The Institutes of Devala. A very rare work.

Beginning. सिन्धुतीरे सुखासीनं देवलं मुनिसत्तमम् ।
समेत्य मुनयः सर्व्वे इदं वचनमब्रवीत् ॥

End. एकैकं ह्रासयेत् पिण्डान् तीव्रचान्द्रायणं चरेत् ।
यथाकथञ्चित् पिण्डानां चत्वारिंशच्छतद्वयम् ॥
इति श्रीदेवलप्रोक्तं धर्म्मशास्त्रं समाप्तम् ।

No. 818.
DEVAPRATISHṬHA'-VIDHI.
देवप्रतिष्ठाविधिः ।

Substance, country paper. Folia, 9. Lines on a page, 8. Charac·r Nágara. Date, ?

Rules for the consecration of images. Annexed is a dissertation on the competency of S'údras to worship the image of a deity.

Beginning. अथातो देवताप्रतिष्ठापनकालनिर्णयः । तत्र कर्म्मलोपात् सुरार्च्चनमिति काश्यपवचनात् काललोपात् सुरार्च्चनमिति राजर्षिवचनाच्च कर्म्मकालादिलोपजनितप्रत्यवायनिरासाय देवार्च्चनस्यावश्यकत्वं तदङ्गत्वेन मूर्त्तिप्रतिष्ठापनस्य कालनिर्णय उच्यते ।

End. स्त्रीशूद्राद्यै र्न कर्त्तव्यं शालग्रामशिलार्च्चनम् ।
कापालिकैरन्त्यजैर्वाप्यनुलोमविलोमजैः ॥
स्त्रीशूद्रद्यगुरदैः सर्व्वैः पूज्यौ चण्डीविनायकौ ।
सर्व्वत्र जायते सिद्धिरिह लोके परत्र च ॥
इति स्त्रीशूद्रादीनां देवार्च्चनविचारः ।

No. 819.

DHARMADÁNA-PADDHATI.

धर्म्मदानपद्धतिः ।

Substance, country paper. Folia, 11. Lines on a page, 10. Character, Nágara. Date, ?

On gifts to Bráhmaṇas from a pious motive. The author's name is not apparent.

Beginning. अथ हेमतुलादितुलादानविधिः । तत्र कर्त्ता शुचिः शुक्लवासाः धौतपाणि-
राचम्य प्राणानायम्य सकुशाक्षतजलहस्तः ।

End. यथा रत्नेषु सर्व्वेषु सर्व्वे देवा व्यवस्थिताः ।
तथा शान्तिं प्रयच्छन्तु रत्नदानेन मे सदा ॥ इति रत्नदानमन्त्रः ।

No. 820.

DHARMA-PRADÍPA.

धर्म्मप्रदीपः ।

Substance, country paper. Folia, 135. Lines on a page, 9. Character, Nágara. Date, ?

A Smṛiti digest. The codex is a fragment, and contains directions for investing an image of S'iva with the holy thread. The author's name is not apparent.

Beginning. अथ वक्ष्ये महेशस्य पवित्रारोपणं परम् ।
तत्पूजादिक्रिया सर्व्वा कृते यस्मिन् कृता भवेत् ॥

End. अनन्तं खण्डितम् ।

No. 821.

DHARMA PRADÍPA-PRÁYAS'CHITTÁDHYÁYA.

धर्म्मप्रदीपे प्रायश्चित्ताध्यायः ।

Substance, country paper. Folia, 103. Lines on a page, 10. Character, Nágara. Date, ?

A part of the work noticed under the last preceding No. It treats of expiations.

Beginning धर्म्मप्रदीपनिबद्धानि वाक्यानि । तात्पर्य्यमीमांसा धर्म्मशास्त्रमिश्रिता ।
वेदा स्थानानि विद्यानि धर्म्मस्य च चतुर्द्दशः(?) ॥

End. सर्व्वस्य सन्नयो विप्राः(?) ।

No. 822.

DHARMA-PRAKÁS'A, SAŃSKÁRA.

धर्म्मप्रकाशे संस्कारकाण्डः ।

Substance, country paper. Folia, 222. Lines on a page, 12. Character, Nágara. Date, ?

A digest of the Smṛitis. The codex contains only that part of the work which refers to rules for the performance of the several sacraments, such as marriage &c. By S'iva Súri.

Beginning. शुण्डादण्डविलोड्नैरिव मुहुर्द्वारयन्तं जनं
प्रत्यूद्गम्यततो निशाकरकरव्रातवन्तं विधना ।
दन्तद्योतितदिङ्मुखेन प्रपितेनानन्दयन्तं शिवं
प्रीतं तद्विन्दुमाधितेद्ध मनयोः चेतं नमारातुर (?) ॥

End. इति श्रीमत्पदवाक्यप्रमाणपारावारपारीणधुरीणमीमांसासाम्राज्यधुरन्धरधर्म्मप्रकाशे संस्कारकाण्डः समाप्तः ।

No. 823.

DHARMA-PRAVṚITTI.

धर्म्मप्रवृत्तिः ।

A. Substance, country paper. Folia, 73. Lines on a page, 12. Character, Nágara. Date, ?

B. Another copy. Folia, 114. Lines on a page, 14.
C. Another copy. Folia, 113. Lines on a page, 11.
D. Another copy. Folia, 103. Lines on a page, 13.

A Smṛiti digest. By Náráyaṇa.

Beginning. नारायणं नमस्कृत्य कामदाञ्च सरस्वतीं ।
गणनाथं गुरुंश्चापि धर्म्मसंरक्षणाय वै ॥
धर्म्मप्रवृत्तिः क्रियते कलौ नारायणेन वै ।
विदुषां कर्म्मनिष्ठानां सम्मतिः धर्म्मवर्द्धिनी ॥

End. ग्रन्थं खण्डितम् ।

No. 824.

DHARMA'RṆAVA, TITHI-NIRṆAYA.

धर्म्मार्णवे तिथिनिर्णयः ।

Substance, country paper. Folia, 88. Lines on a page, 9. Character, Nágara. Date. Samvat 1738.

A Smṛiti digest. By Pítámvara Bhaṭṭa, son of Kás'yapa. The codex contains only that portion of the work which treats of the lunar days.

Beginning. धर्म्मार्णवे तिथिनिर्णयो लिख्यते ।
देवान् गुरून् नमस्कृत्य विद्वत्काश्यपसूनुना ।
भट्टपीताम्बरेणायं क्रियते तिथिनिर्णयः ॥
सम्पूर्णायां तिथौ स्यात् दैवे पित्र्ये च कर्म्मणि ।
न तत्र निर्णयं कश्चित् प्रवदन्ति मनीषिणः ॥

End. माघमासस्तपः प्रोक्तः तपस्यः फाल्गुणः स्मृतः ।
धर्म्मार्णवोऽयं ग्रन्थ समाप्त ॥ सं १७३८ ।

No. 825.

DHARMA'RṆAVA, SADA'NANDA-PRAKA'S'A.

धर्म्मार्णवे सदानन्दप्रकाशः ।

Substance, country paper. Folia, 262. Lines on a page, 13. Character, Nágara. Date, ?

A part of the work noticed under the last preceding No. It contains a dissertation on the times suitable for bathing after recovery from illness.

Beginning. तत्र याज्ञवल्क्यः । आर्षेन्दश्च दैवत्यो विनियोगस्तथैव च ।
वेदितव्यं प्रयत्नेन ब्राह्मणेन विशेषतः ॥

End. कदाचिन्नैव स्नानं रोगनिर्मुक्तजन्तोः——
लग्ने चरे सूर्य्यकुजे च वारे
रिक्तातिथौ चन्द्रबले च हीने ।
केन्द्रत्रिकोणाष्टमगतैश्च पापैः
स्नानं हितं रोगविमुक्तकानाम् ॥

No. 826.

DHARMA-SETU.

धर्म्मसेतुः ।

Substance, country paper. Folia, 515. Lines on a page, 9. Character, Nágara. Date, ?

Rules regarding the performance of the diurnal religious duties. By Raghunátha.

Beginning. तथाहि । अज्ञातस्य विचार्य्यत्वेन धर्म्मज्ञानमन्वेषितव्यं तस्य च लौकिकप्रमाणगम्यत्वाभावात् । शास्त्रमेव प्रमाणं वाच्यम् । तथा च शास्त्रेण धर्म्मज्ञाने निवृत्ते तज्जिज्ञासा । सत्यां तु तस्यां तत्प्रमाणीभूते शास्त्रे प्रवृत्तिः ।

End. यथा । कुष्माण्डैर्जुहुयाद्यो पूत इव मन्येत यथा स्तेनो यथा भ्रूणहैवमेष भवति । योऽयोनौ रेतः सिञ्चतीत्यादि । इति श्रीरघुनाथीये धर्म्मसेतौ शयनविधिपर्व्व समाप्तम् ।

No. 827.

DHARMATATTVA-KAMALÁKARA, DÁNA-KAMALÁKARA.

धर्मतत्त्वकमलाकरे दानकमलाकरः ।

Substance, country paper. Folia, 218. Lines on a page, 10. Character, Nágara. Date, ?

A Smṛiti digest of great renown. The codex contains the second part of the work, and refers to religious gifts. By Kamalákara Bhaṭṭa, son of Rámakṛishṇa and grandson of Náráyaṇa.

Beginning. नारायणात्मजश्रीमद्रामकृष्णस्य सूनुना ।
कमलाकरभट्टेन दानमत्र निरूप्यते ॥

End. श्रीमन्नारायणाख्यात् समजनि विबुधो रामकृष्णाभिधान-
स्तत्सूनुः सर्वविद्याम्बुधिनिजचुलुकीकारतः कुम्भजन्मा ।
दृष्ट्वा नानानिबन्धान् कमलपदपरस्त्वाकरो विरवच (?)
श्रीविष्णोः पादभक्तो रघुपतिपदयोः स्वसमं प्राजयच (?) ॥
दानकमलाकरो नाम द्वितीयपरिच्छेदः समाप्तः ।

No. 828.

DHARMA-TATTVA KAMALÁKARA, SAMAYA-PRAKÁS'A.

धर्मतत्त्वकमलाकरे समयप्रकाशः ।

Substance, country paper. Folia, 50. Lines on a page, 21. Character, Nágara. Date, ?

Another part of the work noticed under the last preceding No. It treats of the times meet for religious rites.

Beginning. धार्यं खण्डितम् ।

End. मन्दे चार्के गुरावापि वारेष्वेतेषु वैधृति ।
व्यतीपातेऽधिकं पुण्यं स्नानतो लभते नरः ॥ शाके १५५१ ॥

No. 829.

DINAKARODYOTA, PU'RTA KAṆḌA.

दिनकरोद्योते पूर्त्तकाण्डः ।

Substance, country paper. Folia, 906. Lines on a page, 9. Character, Nágara. Date, ?

An elaborate work on Smṛiti. By Gágá Bhaṭṭa *alias* Vis'ves'vara Bhaṭṭa, son of Dinakara, and a descendant of Bhaṭṭa Náráyana. The codex contains the part referring to works of public utility.

Beginning. सारं यच्छ्रुतिशिरसामगोचरं यन्मनोवचसाम् ।
तत् कौशल्यावचसां शिचापात्रं महोवन्दे ॥
मीमांसार्णवकर्णधारविबुधः श्रीभट्टनारायण-
सद्वंशस्य करीरतां भजति यो विश्वेश्वराख्यः कृती ।
गागाभट्ट इति प्रथां दिनकरात् प्राप्तः पितुर्लालना-
त्तेनाचारनिबन्धनो दिनकरोद्योतोऽधुना पूर्य्यते ॥

End. इति मीमांसकभट्टदिनकरसूनुगागाभट्टापरनामकविश्वेश्वरकृतौ दिनकरोद्योते नवमः पूर्त्तकाण्डः समाप्तः ॥

No. 830.

DINAKARODYOTA, VYAVAHA'RA KAṆḌA.

दिनकरोद्योते व्यवहारकाण्डः ।

Substance, country paper. Folia, 120. Lines on a page, 10. Character, Nágara. Date, ?

Another part of the work noticed under the last preceding No. It treats of Judicature.

Beginning. मीमांसैकधुरन्धरः श्रुतिधरो न्यायेऽपि वागीश्वरः
साहित्यामृतसागरः सुजनतायज्ञीरसालद्रुमः ।
यं विद्वन्मणिशेखरो दिनकरः प्रासूत विश्वेश्वरं
तेनायं व्यवहारगो दिनकरोद्योतोऽधुना पूर्य्यते ॥

End. पुरोहितं वरयेदिति ।

No. 831.

DINAKARODYOTA, VRATA KAṆḌA.

दिनकरोद्योते व्रतकाण्डः ।

Substance, country paper. Folia, 298. Lines on a page, 13. Character, Nágara. Date, ?

Another part of the work noticed under No. 829. It treats of fasts and Vrata ceremonies.

Beginning. नीलोत्पलाभिराम कामं साकेतवालानां ।
दशरथतोषनिधानं जगन्निदानं तदाकलये ॥
मीमांसैकधुरन्धरः श्रुतिचरो न्यायेऽपि वागीश्वरः
साहित्यामृतसागरः सुजनतावल्लीरसालद्रुमः ।
यं विद्वन्मणिशेखरो दिनकरः प्रासूत विश्वेश्वरं
तेनायं व्रतगोत्तरो दिनकरोद्योतोऽधुना पूर्य्यते ॥

End. एतन्वर्त्तनरो भक्त्या निष्पापसुखमश्नुते । इति चन्द्रशयनविधिः । इति ।

No. 832.

DIVYA'NUSHṬHA'NA-PADDHATI.

दिव्यानुष्ठानपद्धतिः ।

Substance, country paper. Folia, 19. Lines on a page, 8. Character, Nágara. Date, ?

Directions for performing judicial ordeals. By Náráyaṇa, son of Rámes'vara Bhaṭṭa.

Beginning. चाद्यं खण्डितम् ।

End. भट्टरामेश्वरसुतो भट्टनारायणः सुधीः ।
अनुष्ठानसुखायेमां कृतवान् दिव्यपद्धतिम् ॥
इति श्रीविद्वन्मुकुटमणिश्रीरामेश्वरभट्टसूतनारायणभट्टकृता दिव्यानुष्ठानपद्धतिः ।

No. 833.

DUSHTA-RAJODARS'ANA-S'ANTI.

दुष्टरजोदर्शनशान्तिः ।

A. Substance, country paper. Folia, 11. Lines on a page, 8. Character, Nágara. Date, Samvat 1647.

B. Another copy. Folia, 12. Lines on a page, 11 Only the last chapter.

On the rites to be performed in order to obviate the evils arising from the manifestation of puberty on an inauspicious day.

Beginning. अथ गर्भाधानादिसंस्कारक्रमेण सनिर्म्मिताः शान्तयः उच्यन्ते । तत्र प्रथमरजो-
दुष्टमासा उच्यन्ते । तत्र चैत्रज्येष्ठाषाढभाद्रपदकार्त्तिकपौषा अशुभाः ॥

End. प्राक् पश्चाद्वा उत उदीच्यां चन्द्रादीन् सम्पूज्य यथोपक्रमं निर्वापहोमाभिषेकान्
विदध्यादिति विशेषः । अन्यत्सर्व्वं समम् । इति दुष्टरजोदर्शनशान्तिः समाप्ता ।
संवत् १६४७ ।

No 834.

GAṆA-S'ANTI.

गणशान्तिः ।

